## पाण्डुकम्बलादिनिः । (११/१२१२)

पाण्डुकम्बलशब्दात् तृतीयासमर्थात् परिवृतो रथः इत्येतस्मिन्नर्थे इनिः प्रत्ययो भवति । अणोऽपवादः । [1]पाण्डुकम्बली, पाण्डुकम्बलिनौ, पाण्डुकम्बलिनः (म.भा.२.२७४) । पाण्डुकम्बलशब्दो [2]राजास्तरणस्य वर्णकम्बलस्य वाचकः । मत्वर्थीयेनैव[3] सिद्धे वचनमणो निवृत्त्यर्थम् ॥

## द्वैपवैयाघ्रादञ् । (१२/१२१३)

द्वीपिव्याघ्रयो[4]विकारभूते चर्मणो द्वैपवैयाघ्रे[5], ताभ्यां तृतीयासमर्थाभ्यां परिवृतो रथः इत्येतस्मिन्नर्थे अञ् प्रत्ययो भवति । अणोऽपवादः । [6]स्वरे विशेषः । द्वैपेन[7] परिवृतो रथः द्वैपः । [8]वैयाघ्रः ॥

## कौमारापूर्ववचने । (१३/१२१४)

कौमार इत्येतदण्प्रत्ययान्तं निपात्यतेऽपूर्ववचने । [9]पाणिग्रहणस्यापूर्ववचनम् । उभयतः स्त्रियाः अपूर्वत्वे (म.भा. २. २७४) निपातनमेतत् । अपूर्वपतिं कुमारीं पतिरुपपन्नः कौमारः पतिः । कुमारीशब्दाद् द्वितीयासमर्थाद् उपयन्तरि प्रत्ययः । अपूर्वपतिः कुमारी पतिमुपपन्ना कौमारी भार्या (म. भा. २. २७४) । प्रथमान्तादेव स्वार्थे प्रत्ययोऽपूर्वत्वे द्योत्ये ।

कौमारापूर्ववचने कुमार्या अण् विधीयते ।
अपूर्वत्वं यदा तस्याः कुमार्यां भवतीति वा[10] (म. भा. २ः २७५) ॥

कुमार्यां भवः कौमारः पतिः, तस्य स्त्री कौमारी भार्या इति सिद्धम् ॥

## तत्रोद्धृतममत्रेभ्यः । (१४/१२१५)

[11]तत्र इति सप्तमीसमर्थादमत्रवाचिनः शब्दाद् उद्धृतम् इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति । भुक्तोच्छिष्टम् उद्धृतम्[12] उच्यते, यस्योद्धरणम् इति प्रसिद्धिः । अमत्रं भाजनं पात्रमुच्यते । शरावेषु उद्धृतः शाराव [13]ओदनः । [14]मात्लिकः । [15]कार्परः । अमत्रेभ्यः इति किम् ? पाणावुद्धृत ओदनः । तत्र इति सप्तमी समर्थविभक्तिः 'क्षीराड् ढञ्' (४. २. २०/१२२२) इति यावदनुवर्तते ॥

## स्थण्डिलाच्छयितरि व्रते । (१५/१२१६)

[16]स्थण्डिलशब्दात् सप्तमीसमर्थात् शयितर्यभिधेये यथाविहितं प्रत्ययो भवति, समुदायेन चेत् व्रतं गम्यते । व्रतम् इति शास्त्रितो नियमः उच्यते । स्थण्डिले शयितुं व्रतमस्य स्थाण्डिलो [17]भिक्षुः । स्थाण्डिलो ब्रह्मचारी । व्रते इति किम् ? स्थण्डिले शेते [18]ब्रह्मदत्तः ॥

---

1. पाण्डुकम्बलेन परिवृतः पाण्डुकम्बली रथः ग. 2. गजास्तरणस्य ग, गजास्तरणकम्बलस्य ह, रथास्तरणम् क. 3. इति च इत्यधिकम् फ. 4. विकारे फ. 5. इति शब्दौ वर्तेते इत्यधिकम् फ, शब्दे इत्यधिकम् ह. 6. स्वरविशेषः ब, नास्ति ड. 7. चर्मणा इत्यधिकम् फ. 8. वैयाघ्रेण परिवृतो रथः इत्यधिकम् क.ह. 9. पाणिग्रहस्य फ, वाक्यमिदं नास्ति ह. 10. अनेन प्रत्याख्यायते योगः इत्यधिकम् ब.क.ड.फ.ह. 11. तत्र इति सप्तमी क्षीराड् ढञ् इति यावदनुवर्तते इत्यधिकम् फ. 12. इति इत्यधिकम् फ. 13. ओदनः नास्ति ब. क. 14. माल्लकः क, मालकः ब. 15. खार्परः क, कार्परिः ह. 16. सप्तमी समर्थविभक्तिः इति अनुवर्तते इत्यधिकम् फ. 17. भिक्षुः नास्ति फ. 18. देवदत्तः ब. क. ग.